# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम्** - ६ (New) | **गुणाः** - ७० |
| **विषयः** - स्वामिनारायणवेदान्तः(S) | **कोड- CC - 2.3.6** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - १०/१२/२०१८ | **सन्दर्भग्रन्थः**- गीतास्वामिनारायणभाष्यम् | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ अधोदत्तानां श्लोकानां कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गान्वयं व्याख्यासहितञ्चार्थनिरूपणं कुरुत ।** १०

१. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

२. कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।

३. अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ।

**प्र-२ द्वयोः कस्यचिदेकस्य सविस्तरं निरूपणं कुरुत ।** १०

१. स्थितप्रज्ञलक्षणानि ।

२. गीताकथितयोगशब्दार्थः ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ अधोदत्तानां श्लोकानां कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गान्वयं व्याख्यासहितञ्चार्थनिरूपणं कुरुत ।** १०

१. ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

२. मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युद्धस्व विगतज्वरः ॥

३. यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

**प्र-४ द्वयोः कस्यचिदेकस्य सविस्तरं निरूपणं कुरुत ।** १०

१. अवतारवादः ।

२. गीताकथितकर्मयोगः ।

॥ तृतीयान्वितिः ॥

**प्र-५ अधोदत्तानां श्लोकानां कयोश्चिद् द्वयोः ससन्दर्भप्रसङ्गान्वयं व्याख्यासहितञ्चार्थनिरूपणं कुरुत । १०**

१. ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

२. न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥

३. यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

**प्र-६ द्वयोः कस्यचिदेकस्य सविस्तरं निरूपणं कुरुत । १०**

१. ब्रह्मनिर्वाणयोगः ।

२. योगिनां लक्षणानि ।

**प्र-७ यथोचितम् उत्तरं लिखत । १०**

१. गीतायां प्रथमः श्लोकः केन कथितः ?

२. अश्रुपूर्णाकुलेक्षणमिति शब्दः स्थूलसूक्ष्मकारणेति देहत्रयमध्ये कस्य भावं प्रदर्शयति ?

३. हृषीकेशस्य शङ्खस्य नाम किम् ?

४. गीतायां धर्मशब्दस्य मुख्यार्थः कः ?

५. **नित्यसत्त्वस्थः** अर्थात् किम् ?

६. **कर्म ब्रह्मोद्भवं विद्धि** इत्यत्र ब्रह्मपदस्य कोऽर्थः ?

७. कस्मादन्नसम्भवः ?

८. चातुर्वर्ण्यं केन सृष्टम् ?

९. कः कृत्स्नकर्मकृत् ?

१०. द्रव्यमयाद् यज्ञात् कः श्रेष्ठः ?

११. सांख्ययोगौ पृथगिति के प्रवदन्ति ?

१२. **एतस्य वा अक्षरस्य प्रशासने** इति वचनं कस्य शास्त्रस्य ?

१३. योगमारुरुक्षोर्मुनेः किं कारणमुच्यते ?

१४. **ब्रह्मचारिव्रते स्थितः** इत्यस्य कोऽर्थः ?

१५. किं दुर्निग्रहं चलम् ?